# guru gItA - short version

# શ્રીગુરુગીતા લઘુ

## Document Information

Text title : gurugItA shorter version

File name : gurugiitaa.itx

Category : gItA, giitaa, gurudev

Location : doc_giitaa

Author : Vyasa (by tradition) author of Puranas

Transliterated by : Kapila and Mrs. Shankaran achintya at ican.net

Proofread by : Sunder Hattangadi, Kirk Wortman

Latest update : July 22, 1998, November 22, 2006

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

guru gItA - short version

# શ્રીગુરુગીતા લઘુ

# શ્રીગુરુગીતા લઘુ

## ॥ શ્રીગુરુગીતા ॥

### ॥ શ્રી ગુરુપાદુકા પઞ્ચકમ્ ॥

ૐ નમો ગુરુભ્યો ગુરુપાદુકાભ્યો નમઃ પરેભ્યઃ પરપાદુકાભ્યઃ ।
આચાર્ય સિદ્ધેશ્વર પાદુકાભ્યો નમો નમઃ શ્રી ગુરુપાદુકાભ્યઃ ॥

ઐઙ્કાર હ્રીઙ્કાર રહસ્ય યુક્ત
શ્રીઙ્કાર ગૂઢાર્થમહાવિભૂત્યા ॥ ૧॥

ઓઙ્કાર મર્મ પ્રતિપાદિનીભ્યાં
નમો નમઃ શ્રી ગુરુપાદુકાભ્યામ્ ॥ ૨॥

હોત્રાગ્નિ હૌત્રાગ્નિ હવિષ્યહોત્ર
હોમાદિ સર્વાકૃતિ ભાસમાનામ્ ।
યદ્ બ્રહ્મ તદ્બોધ વિતારિણીભ્યાં
નમો નમઃ શ્રી ગુરુપાદુકાભ્યામ્ ॥ ૩॥

કામાદિ સર્પવ્રજ ગારુડાભ્યાં
વિવેક વૈરાગ્ય નિધિ પ્રદાભ્યામ્ ।
બોધ પ્રદાભ્યાં દૃતમોક્ષદાભ્યાં
નમો નમઃ શ્રી ગુરુપાદુકાભ્યામ્ ॥ ૪॥

અનન્ત સંસાર સમુદ્ર તાર
નૌકાયિતાભ્યાં સ્થિરભક્તિદાભ્યામ્ ।
જાડ્યાબ્ધિ સંશોષણ વાડવાભ્યાં
નમો નમઃ શ્રી ગુરુપાદુકાભ્યામ્ ॥ ૫॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ અથ શ્રી ગુરુગીતા પ્રારંભઃ ॥

શ્રીગણેશાય નમઃ । શ્રીસરસ્વત્યૈ નમઃ । શ્રીગુરુભ્યો નમઃ ।

॥ ૐ ॥

અસ્ય શ્રી ગુરુગીતા સ્તોત્રમન્ત્રસ્ય ।
ભગવાન્ સદાશિવ ઋષિઃ ।
નાનાવિધાનિ છન્દાંસિ ।
શ્રી ગુરુપરમાત્મા દેવતા ।
હં બીજમ્ । સઃ શક્તિઃ । ક્રોં કીલકમ્ ।
શ્રી ગુરુપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

## ॥ અથ ધ્યાનમ્ ॥

હંસાભ્યાં પરિવૃત્તપત્રકમલૈર્દિવ્યૈર્જગત્કારણૈર્ -
વિશ્વોત્કીર્ણમનેકદેહનિલયૈઃ સ્વચ્છન્દમાત્મેચ્છયા ।
તદ્યોતં પદશાંભવં તુ ચરણં દીપાઙ્કુરગ્રાહિણં
પ્રત્યક્ષાક્ષરવિગ્રહં ગુરુપદં ધ્યાયેદ્વિભું શાશ્વતમ્ ॥

મમ ચતુર્વિધપુરુષાર્થસિદ્ધ્યર્થે જપે વિનિયોગઃ ।

## ॥ અથ શ્રીગુરુગીતા ॥

સૂત ઉવાચ -
કૈલાસ શિખરે રમ્યે ભક્તિસન્ધાનનાયકમ્ ।
પ્રણમ્ય પાર્વતી ભક્ત્યા શઙ્કરં પર્યપૃચ્છત ॥ ૧॥

શ્રી દેવ્યુવાચ -
ૐ નમો દેવદેવેશ પરાત્પરજગદ્ગુરો ।
સદાશિવ મહાદેવ ગુરુદીક્ષાં પ્રદેહિ મે ॥ ૨॥

કેન માર્ગેણ ભો સ્વામિન્ દેહિ બ્રહ્મમયો ભવેત્ ।
ત્વં કૃપાં કુરુ મે સ્વામિન્ નમામિ ચરણૌ તવ ॥ ૩॥

ઈશ્વર ઉવાચ -

મમરૂપાસિ દેવિ ત્વં ત્વત્પ્રીત્યર્થં વદામ્યહમ્ ।
લોકોપકારકઃ પ્રશ્નો ન કેનાપિ કૃતઃ પુરા ॥ ૪॥

દુર્લભં ત્રિષુ લોકેષુ તચ્છૃણુષ્વ વદામ્યહમ્ ।
ગુરું વિના બ્રહ્મ નાન્યત્સત્યં સત્યં વરાનને ॥ ૫॥

વેદશાસ્ત્રપુરાણાનિ ઇતિહાસાદિકાનિ ચ ।
મન્ત્રયન્ત્રાદિવિદ્યાશ્ચ સ્મૃતિરુચ્ચાટનાદિકમ્ ॥ ૬॥

શૈવશાક્તાગમાદીનિ અન્યાનિ વિવિધાનિ ચ ।
અપભ્રંશકરાણીહ જીવાનાં ભ્રાન્તચેતસામ્ ॥ ૭॥

યજ્ઞો વ્રતં તપો દાનં જપસ્તીર્થં તથૈવ ચ ।
ગુરુતત્ત્વમવિજ્ઞાય મૂઢાસ્તે ચરતે જનાઃ ॥ ૮॥

ગુરુર્બુદ્ધ્યાત્મનો નાન્યત્ સત્યં સત્યં ન સંશયઃ ।
તલ્લાભાર્થં પ્રયત્નસ્તુ કર્તવ્યો હિ મનીષિભિઃ ॥ ૯॥

ગૂઢ વિદ્યા જગન્માયા દેહે ચાજ્ઞાનસંભવા ।
ઉદયો યત્પ્રકાશેન ગુરુશબ્દેન કથ્યતે ॥ ૧૦॥

સર્વપાપવિશુદ્ધાત્મા શ્રીગુરોઃ પાદસેવનાત્ ।
દેહી બ્રહ્મ ભવેદ્યસ્માત્ત્વત્કૃપાર્થં વદામિ તે ॥ ૧૧॥

ગુરુપાદાંબુજં સ્મૃત્વા જલં શિરસિ ધારયેત્ ।
સર્વતીર્થાવગાહસ્ય સમ્પ્રાપ્નોતિ ફલં નરઃ ॥ ૧૨॥

શોષણં પાપપઙ્કસ્ય દીપનં જ્ઞાનતેજસામ્ ।
ગુરુપાદોદકં સમ્યક્ સંસારાર્ણવતારકમ્ ॥ ૧૩॥

અજ્ઞાનમૂલહરણં જન્મ કર્મ નિવારણમ્ ।
જ્ઞાનવૈરાગ્યસિદ્ધ્યર્થં ગુરુપાદોદકં પિબેત્ ॥ ૧૪॥

ગુરોઃ પાદોદકં પીત્વા ગુરોરુચ્છિષ્ટભોજનમ્ ।
ગુરુમૂર્તેઃ સદા ધ્યાનં ગુરુમન્ત્રં સદા જપેત્ ॥ ૧૫॥

કાશી ક્ષેત્રં તન્નિવાસો જાહ્નવી ચરણોદકમ્ ।
ગુરુર્વિશ્વેશ્વરઃ સાક્ષાત્ તારકં બ્રહ્મ નિશ્ચિતમ્ ॥ ૧૬॥

ગુરોઃ પાદોદકં યત્તુ ગયાઽસૌ સોઽક્ષયો વટઃ ।
તીર્થરાજઃ પ્રયાગશ્ચ ગુરુમૂર્ત્યૈ નમો નમઃ ॥ ૧૭॥

ગુરુમૂર્તિં સ્મરેન્નિત્યં ગુરુનામ સદા જપેત્ ।
ગુરોરાજ્ઞાં પ્રકુર્વીત ગુરોરન્યન્ન ભાવયેત્ ॥ ૧૮॥

ગુરુવક્ત્રસ્થિતં બ્રહ્મ પ્રાપ્યતે તત્પ્રસાદતઃ ।
ગુરોર્ધ્યાનં સદા કુર્યાત્કુલસ્ત્રી સ્વપતેર્યથા ॥ ૧૯॥

સ્વાશ્રમં ચ સ્વજાતિં ચ સ્વકીર્તિપુષ્ટિવર્ધનમ્ ।
એતત્સર્વં પરિત્યજ્ય ગુરોરન્યન્ન ભાવયેત્ ॥ ૨૦॥

અનન્યાશ્ચિન્તયન્તો માં સુલભં પરમં પદમ્ ।
તસ્માત્ સર્વપ્રયત્નેન ગુરોરારાધનં કુરુ ॥ ૨૧॥

ત્રૈલોક્યે સ્ફુટવક્તારો દેવાદ્યસુરપન્નગાઃ ।
ગુરુવક્ત્રસ્થિતા વિદ્યા ગુરુભક્ત્યા તુ લભ્યતે ॥ ૨૨॥

ગુકારસ્ત્વન્ધકારશ્ચ રુકારસ્તેજ ઉચ્યતે ।
અજ્ઞાનગ્રાસકં બ્રહ્મ ગુરુરેવ ન સંશયઃ ॥ ૨૩॥

ગુકારઃ પ્રથમો વર્ણો માયાદિગુણભાસકઃ ।
રુકારો દ્વિતીયો બ્રહ્મ માયા ભ્રાન્તિ વિનાશનમ્ ॥ ૨૪॥

એવં ગુરુપદં શ્રેષ્ઠં દેવાનામપિ દુર્લભમ્ ।
હાહા હૂહૂ ગણૈશ્ચૈવ ગન્ધર્વૈશ્ચ પ્રપૂજ્યતે ॥ ૨૫॥

ધ્રુવં તેષાં ચ સર્વેષાં નાસ્તિ તત્ત્વં ગુરોઃ પરમ્ ।
આસનં શયનં વસ્ત્રં ભૂષણં વાહનાદિકમ્ ॥ ૨૬॥

સાધકેન પ્રદાતવ્યં ગુરુસંતોષકારકમ્ ।
ગુરોરારાધનં કાર્યં સ્વજીવિત્વં નિવેદયેત્ ॥ ૨૭॥

કર્મણા મનસા વાચા નિત્યમારાધયેદ્ગુરુમ્ ।
દીર્ઘદણ્ડં નમસ્કૃત્ય નિર્લજ્જો ગુરુસન્નિધૌ ॥ ૨૮॥

શરીરમિન્દ્રિયં પ્રાણાં સદ્ગુરુભ્યો નિવેદયેત્ ।
આત્મદારાદિકં સર્વં સદ્ગુરુભ્યો નિવેદયેત્ ॥ ૨૯॥

કૃમિકીટભસ્મવિષ્ઠા દુર્ગન્ધિમલમૂત્રકમ્ ।
શ્લેષ્મરક્તં ત્વચા માંસં વઞ્ચયેન્ન વરાનને ॥ ૩૦॥

સંસારવૃક્ષમારૂઢાઃ પતન્તો નરકાર્ણવે ।

યેન ચૈવોદ્ધૃતાઃ સર્વે તસ્મૈ શ્રીગુરવે નમઃ ॥ ૩૧॥

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુર્ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુરેવ પરબ્રહ્મ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૩૨॥

હેતવે જગતામેવ સંસારાર્ણવસેતવે ।
પ્રભવે સર્વવિદ્યાનાં શમ્ભવે ગુરવે નમઃ ॥ ૩૩॥

અજ્ઞાનતિમિરાન્ધસ્ય જ્ઞાનાઞ્જનશલાકયા ।
ચક્ષુરુન્મીલિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૩૪॥

ત્વં પિતા ત્વં ચ મે માતા ત્વં બન્ધુસ્ત્વં ચ દેવતા ।
સંસારપ્રતિબોધાર્થં તસ્મૈ શ્રીગુરવે નમઃ ॥ ૩૫॥

યત્સત્યેન જગત્સત્યં યત્પ્રકાશેન ભાતિ તત્ ।
યદાનન્દેન નન્દન્તિ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૩૬॥

યસ્ય સ્થિત્યા સત્યમિદં યદ્ભાતિ ભાનુરૂપતઃ ।
પ્રિયં પુત્રદિ યત્પ્રીત્યા તસ્મૈ શ્રીગુરવે નમઃ ॥ ૩૭॥

યેન ચેતયતે હીદં ચિત્તં ચેતયતે ન યમ્ ।
જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૩૮॥

યસ્ય જ્ઞાનાદિદં વિશ્વં ન દૃશ્યં ભિન્નભેદતઃ ।
સદેકરૂપરૂપાય તસ્મૈ શ્રીગુરવે નમઃ ॥ ૩૯॥

યસ્યામતં તસ્ય મતં મતં યસ્ય ન વેદ સઃ ।
અનન્યભાવ ભાવાય તસ્મૈ શ્રીગુરવે નમઃ ॥ ૪૦॥

યસ્ય કારણરૂપસ્ય કાર્યરૂપેણ ભાતિ યત્ ।
કાર્યકારણરૂપાય તસ્મૈ શ્રીગુરવે નમઃ ॥ ૪૧॥

નાનારૂપમિદં સર્વં ન કેનાપ્યસ્તિ ભિન્નતા ।
કાર્યકારણતા ચૈવ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૪૨॥

યદઙ્ઘ્રિકમલદ્વન્દ્વં દ્વન્દ્વતાપનિવારકમ્ ।
તારકં સર્વદાઽપદ્ભ્યઃ શ્રીગુરું પ્રણમામ્યહમ્ ॥ ૪૩॥

શિવે ક્રુધ્દે ગુરુસ્ત્રાતા ગુરૌ ક્રુધ્દે શિવો ન હિ ।
તસ્માત્ સર્વપ્રયત્નેન શ્રીગુરું શરણં વ્રજેત્ ॥ ૪૪॥

વન્દે ગુરુપદદ્વન્દ્વં વાઙ્મનશ્ચિત્તગોચરમ્

શ્વેતરક્તપ્રભાભિન્નં શિવશક્ત્યાત્મકં પરમ્ ॥ ૪૫॥

ગુકારં ચ ગુણાતીતં રુકારં રૂપવર્જિતમ્ ।

ગુણાતીતસ્વરૂપં ચ યો દદ્યાત્સ ગુરુઃ સ્મૃતઃ ॥ ૪૬॥

અત્રિનેત્રઃ સર્વસાક્ષી અચતુર્બાહુરચ્યુતઃ ।

અચતુર્વદનો બ્રહ્મા શ્રીગુરુઃ કથિતઃ પ્રિયે ॥ ૪૭॥

અયં મયાઞ્જલિર્બદ્ધો દયા સાગરવૃદ્ધયે ।

યદનુગ્રહતો જન્તુશ્ચિત્રસંસારમુક્તિભાક્ ॥ ૪૮॥

શ્રીગુરોઃ પરમં રૂપં વિવેકચક્ષુષોઽમૃતમ્ ।

મન્દભાગ્યા ન પશ્યન્તિ અન્ધાઃ સૂર્યોદયં યથા ॥ ૪૯॥

શ્રીનાથચરણદ્વન્દ્વં યસ્યાં દિશિ વિરાજતે ।

તસ્યૈ દિશે નમસ્કુર્યાદ્ ભક્ત્યા પ્રતિદિનં પ્રિયે ॥ ૫૦॥

તસ્યૈ દિશે સતતમઞ્જલિરેષ આર્યે
    પ્રક્ષિપ્યતે મુખરિતો મધુપૈર્બુધૈશ્ચ ।
જાગર્તિ યત્ર ભગવાન્ગુરુચક્રવર્તી
    વિશ્વોદય પ્રલયનાટકનિત્યસાક્ષી ॥ ૫૧॥

શ્રીનાથાદિ ગુરુત્રયં ગણપતિં પીઠત્રયં ભૈરવં
    સિદ્ધૌઘં બટુકત્રયં પદયુગં દૂતીક્રમં મણ્ડલમ્ ।
વીરાન્દ્વ્યષ્ટચતુષ્ક ષષ્ટિ નવકં વીરાવલી પઞ્ચકં
    શ્રીમન્માલિનિમન્ત્રરાજસહિતં વન્દે ગુરોર્મણ્ડલમ્ ॥ ૫૨॥

અભ્યસ્તૈઃ સકલૈઃ સુદીર્ઘમનિલૈર્વ્યાધિપ્રદૈર્દુષ્કરૈઃ
    પ્રાણાયામશતૈરનેકકરણૈર્દુઃખાત્મકૈર્દુર્જયૈઃ ।
યસ્મિન્નભ્યુદિતે વિનશ્યતિ બલી વાયુઃ સ્વયં તત્ક્ષણાત્
    પ્રાપ્તું તત્સહજં સ્વભાવમનિશં સેવધ્વમેકં ગુરુમ્ ॥ ૫૩॥

સ્વદેશિકસ્યૈવ શરીરચિન્તનં
    ભવેદનન્તસ્ય શિવસ્ય ચિન્તનમ્ ।
સ્વદેશિકસ્યૈવ ચ નામકીર્તનં
    ભવેદનન્તસ્ય શિવસ્ય કીર્તનમ્ ॥ ૫૪॥

યત્પાદરેણુકણિકા કાપિ સંસારવારિધેઃ ।

સેતુબન્ધાયતે નાથં દેશિકં તમુપાસ્મહે ॥ ૫૫॥

યસ્માદનુગ્રહં લબ્ધ્વા મહદજ્ઞાનમુત્સૃજેત્ ।
તસ્મૈ શ્રીદેશિકેન્દ્રાય નમશ્ચાભીષ્ટસિદ્ધયે ॥ ૫૬॥

પાદાબ્જં સર્વસંસારદાવાનલવિનાશકમ્ ।
બ્રહ્મરન્ધ્રે સિતામ્ભોજમધ્યસ્થં ચન્દ્રમણ્ડલે ॥ ૫૭॥

અકથાદિત્રિરેખાબ્જે સહસ્રદલમણ્ડલે ।
હંસપાર્શ્વત્રિકોણે ચ સ્મરેત્તન્મધ્યગં ગુરુમ્ ॥ ૫૮॥

સકલભુવનસૃષ્ટિઃ કલ્પિતાશેષપુષ્ટિઃ
    નિખિલનિગમદૃષ્ટિઃ સમ્પદાં વ્યર્થદૃષ્ટિઃ ।
અવગુણપરિમાર્ષ્ટિસ્તત્પદાર્થૈકદૃષ્ટિઃ
    ભવ ગુણપરમેષ્ટિર્મોક્ષમાર્ગૈકદૃષ્ટિઃ ॥ ૫૯॥

સકલભુવનરઙ્ગસ્થાપના સ્તમ્ભયષ્ટિઃ
    સકરુણરસવૃષ્ટિસ્તત્ત્વમાલાસમષ્ટિઃ ।
સકલસમયસૃષ્ટિઃ સચ્ચિદાનન્દદૃષ્ટિર્-
    નિવસતુ મયિ નિત્યં શ્રીગુરોર્દિવ્યદૃષ્ટિઃ ॥ ૬૦॥

અગ્નિશુદ્ધસમં તાત જ્વાલા પરિચકાધિયા ।
મન્ત્રરાજમિમં મન્યેઽહર્નિશં પાતુ મૃત્યુતઃ ॥ ૬૧॥

તદેજતિ તન્નૈજતિ તદ્દૂરે તત્સમીપકે ।
તદન્તરસ્ય સર્વસ્ય તદુ સર્વસ્ય બાહ્યતઃ ॥ ૬૨॥

અજોઽહમજરોઽહં ચ અનાદિનિધનઃ સ્વયમ્ ।
અવિકારશ્ચિદાનન્દ અણીયાન્મહતો મહાન્ ॥ ૬૩॥

અપૂર્વાણાં પરં નિત્યં સ્વયંજ્યોતિર્નિરામયમ્ ।
વિરજં પરમાકાશં ધ્રુવમાનન્દમવ્યયમ્ ॥ ૬૪॥

શ્રુતિઃ પ્રત્યક્ષમૈતિહ્યમનુમાનશ્ચતુષ્ટયમ્ ।
યસ્ય ચાત્મતપો વેદ દેશિકં ચ સદા સ્મરેત્ ॥ ૬૫॥

મનુઞ્ચ યદ્ભવં કાર્યં તદ્વદામિ મહામતે ।
સાધુત્વં ચ મયા દૃષ્ટ્વા ત્વયિ તિષ્ઠતિ સાંપ્રતમ્ ॥ ૬૬॥

અખણ્ડમણ્ડલાકારં વ્યાપ્તં યેન ચરાચરમ્ ।

તત્પદં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૭ ॥

સર્વશ્રુતિશિરોરત્નવિરાજિતપદામ્બુજઃ ।
વેદાન્તામ્બુજસૂર્યો યસ્તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૮ ॥

યસ્ય સ્મરણમાત્રેણ જ્ઞાનમુત્પદ્યતે સ્વયમ્ ।
ય એવ સર્વ સમ્પ્રાપ્તિસ્તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૯ ॥

ચૈતન્યં શાશ્વતં શાન્તં વ્યોમાતીતં નિરઞ્જનમ્ ।
નાદબિન્દુકલાતીતં તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૦ ॥

સ્થાવરં જઙ્ગમં ચૈવ તથા ચૈવ ચરાચરમ્ ।
વ્યાપ્તં યેન જગત્સર્વં તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૧ ॥

જ્ઞાનશક્તિસમારૂઢસ્તત્ત્વમાલા વિભૂષિતઃ ।
ભુક્તિમુક્તિપ્રદાતા યસ્તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૨ ॥

અનેકજન્મસમ્પ્રાપ્તસર્વકર્મવિદાહિને ।
સ્વાત્મજ્ઞાનપ્રભાવેણ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૩ ॥

ન ગુરોરધિકં તત્ત્વં ન ગુરોરધિકં તપઃ ।
તત્ત્વં જ્ઞાનાત્પરં નાસ્તિ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૪ ॥

મન્નાથઃ શ્રીજગન્નાથો મદ્ગુરુસ્ત્રિજગદ્ગુરુઃ ।
મમાત્મા સર્વભૂતાત્મા તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૫ ॥

ધ્યાનમૂલં ગુરોર્મૂર્તિઃ પૂજામૂલં ગુરોઃ પદમ્ ।
મન્ત્રમૂલં ગુરોર્વાક્યં મોક્ષમૂલં ગુરોઃ કૃપા ॥ ૭૬ ॥

ગુરુરાદિરનાદિશ્ચ ગુરુઃ પરમદૈવતમ્ ।
ગુરોઃ પરતરં નાસ્તિ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૭ ॥

સપ્તસાગરપર્યન્ત તીર્થસ્નાનાદિકં ફલમ્ ।
ગુરોરઙ્ઘ્રિપયોબિન્દુસહસ્રાંશે ન દુર્લભમ્ ॥ ૭૮ ॥

હરૌ રુષ્ટે ગુરુસ્ત્રાતા ગુરૌ રુષ્ટે ન કશ્ચન ।
તસ્માત્સર્વપ્રયત્નેન શ્રીગુરું શરણં વ્રજેત્ ॥ ૭૯ ॥

ગુરુરેવ જગત્સર્વં બ્રહ્મવિષ્ણુશિવાત્મકમ્ ।
ગુરોઃ પરતરં નાસ્તિ તસ્માત્સમ્પૂજયેદ્ગુરુમ્ ॥ ૮૦ ॥

જ્ઞાનં વિજ્ઞાનસહિતં લભ્યતે ગુરુભક્તિતઃ ।
ગુરોઃ પરતરં નાસ્તિ ધ્યેયોઽસૌ ગુરુમાર્ગિભિઃ ॥ ૮૧॥

યસ્માત્પરતરં નાસ્તિ નેતિ નેતીતિ વૈ શ્રુતિઃ ।
મનસા વચસા ચૈવ નિત્યમારાધયેદ્ગુરુમ્ ॥ ૮૨॥

ગુરોઃ કૃપા પ્રસાદેન બ્રહ્મવિષ્ણુસદાશિવાઃ ।
સમર્થાઃ પ્રભવાદૌ ચ કેવલં ગુરુસેવયા ॥ ૮૩॥

દેવકિન્નરગન્ધર્વાઃ પિતરો યક્ષચારણાઃ ।
મુનયોઽપિ ન જાનન્તિ ગુરુશુશ્રૂષણે વિધિમ્ ॥ ૮૪॥

મહાહઙ્કારગર્વેણ તપોવિદ્યાબલાન્વિતાઃ ।
સંસારકુહરાવર્તે ઘટયન્ત્રે યથા ઘટાઃ ॥ ૮૫॥

ન મુક્તા દેવગન્ધર્વાઃ પિતરો યક્ષકિન્નરાઃ ।
ઋષયઃ સર્વસિદ્ધાશ્ચ ગુરુસેવા પરાઙ્મુખાઃ ॥ ૮૬॥

ધ્યાનં શ‌ૃણુ મહાદેવિ સર્વાનન્દપ્રદાયકમ્ ।
સર્વસૌખ્યકરં નિત્યં ભુક્તિમુક્તિવિધાયકમ્ ॥ ૮૭॥

શ્રીમત્પરબ્રહ્મ ગુરું સ્મરામિ
    શ્રીમત્પરબ્રહ્મ ગુરું વદામિ ।
શ્રીમત્પરબ્રહ્મ ગુરું નમામિ
    શ્રીમત્પરબ્રહ્મ ગુરું ભજામિ ॥ ૮૮॥

બ્રહ્માનન્દં પરમસુખદં કેવલં જ્ઞાનમૂર્તિં
    દ્વન્દ્વાતીતં ગગનસદૃશં તત્ત્વમસ્યાદિલક્ષ્યમ્ ।
એકં નિત્યં વિમલમચલં સર્વધીસાક્ષિભૂતં
    ભાવાતીતં ત્રિગુણરહિતં સદ્ગુરું તં નમામિ ॥ ૮૯॥

નિત્યં શુદ્ધં નિરાભાસં નિરાકારં નિરઞ્જનમ્ ।
નિત્યબોધં ચિદાનન્દં ગુરું બ્રહ્મ નમામ્યહમ્ ॥ ૯૦॥

હૃદમ્બુજે કર્ણિકમધ્યસંસ્થે
    સિંહાસને સંસ્થિતદિવ્યમૂર્તિમ્ ।
ધ્યાયેદ્ગુરું ચન્દ્રકલાપ્રકાશં
    ચિત્પુસ્તકાભીષ્ટવરં દધાનમ્ ॥ ૯૧॥

શ્વેતામ્બરં શ્વેતવિલેપપુષ્પં
    મુક્તાવિભૂષં મુદિતં દ્વિનેત્રમ્ ।
વામાઙ્કપીઠસ્થિતદિવ્યશક્તિં
    મન્દસ્મિતં સાન્દ્રકૃપાનિધાનમ્ ॥ ૯૨॥

આનન્દમાનન્દકરં પ્રસન્નં
    જ્ઞાનસ્વરૂપં નિજબોધયુક્તમ્ ।
યોગીન્દ્રમીડ્યં ભવરોગવૈદ્યં
    શ્રીમદ્ગુરું નિત્યમહં નમામિ ॥ ૯૩॥

યસ્મિન્સૃષ્ટિસ્થિતિધ્વંસનિગ્રહાનુગ્રહાત્મકમ્ ।
કૃત્યં પઞ્ચવિધં શશ્વદ્ભાસતે તં નમામ્યહમ્ ॥ ૯૪॥

પ્રાતઃ શિરસિ શુક્લાબ્જે  દ્વિનેત્રં દ્વિભુજં ગુરુમ્ ।
વરાભયયુતં શાન્તં સ્મરેત્તં નામપૂર્વકમ્ ॥ ૯૫॥

ન ગુરોરધિકં ન ગુરોરધિકં
    ન ગુરોરધિકં ન ગુરોરધિકમ્ ।
શિવશાસનતઃ શિવશાસનતઃ
    શિવશાસનતઃ શિવશાસનતઃ ॥ ૯૬॥

ઇદમેવ શિવં ત્વિદમેવ શિવં
    ત્વિદમેવ શિવં ત્વિદમેવ શિવમ્ ।
મમ શાસનતો મમ શાસનતો
    મમ શાસનતો મમ શાસનતઃ ॥ ૯૭॥

એવંવિધં ગુરું ધ્યાત્વા જ્ઞાનમુત્પદ્યતે સ્વયમ્ ।
તત્સદ્ગુરુપ્રસાદેન મુક્તોઽહમિતિ ભાવયેત્ ॥ ૯૮॥

ગુરુદર્શિતમાર્ગેણ મનઃશુદ્ધિં તુ કારયેત્ ।
અનિત્યં ખણ્ડયેત્સર્વં યત્કિઞ્ચિદાત્મગોચરમ્ ॥ ૯૯॥

જ્ઞેયં સર્વસ્વરૂપં ચ જ્ઞાનં ચ મન ઉચ્યતે ।
જ્ઞાનં જ્ઞેયસમં કુર્યાન્ નાન્યઃ પન્થા દ્વિતીયકઃ ॥ ૧૦૦॥

એવં શ્રુત્વા મહાદેવિ ગુરુનિન્દાં કરોતિ યઃ ।
સ યાતિ નરકં ઘોરં યાવચ્ચન્દ્રદિવાકરૌ ॥ ૧૦૧॥

યાવત્કલ્પાન્તકો દેહસ્તાવદેવ ગુરું સ્મરેત્ ।

ગુરુલોપો ન કર્તવ્યઃ સ્વચ્છન્દો યદિ વા ભવેત્ ॥ ૧૦૨॥

હુઙ્કારેણ ન વક્તવ્યં પ્રાજ્ઞૈઃ શિષ્યૈઃ કથઞ્ચન ।
ગુરોરગ્રે ન વક્તવ્યમસત્યં ચ કદાચન ॥ ૧૦૩॥

ગુરું ત્વંકૃત્ય હુંકૃત્ય ગુરું નિર્જિત્ય વાદતઃ ।
અરણ્યે નિર્જલે દેશે સ ભવેદ્બ્રહ્મરાક્ષસઃ ॥ ૧૦૪॥

મુનિભિઃ પન્નગૈર્વાઽપિ સુરૈર્વા શાપિતો યદિ ।
કાલમૃત્યુભયાદ્વાપિ ગુરૂ રક્ષતિ પાર્વતિ ॥ ૧૦૫॥

અશક્તા હિ સુરાદ્યાશ્ચ અશક્તા મુનયસ્તથા ।
ગુરુશાપેન તે શીઘ્રં ક્ષયં યાન્તિ ન સંશયઃ ॥ ૧૦૬॥

મન્ત્રરાજમિદં દેવિ ગુરુરિત્યક્ષરદ્વયમ્ ।
સ્મૃતિવેદાર્થવાક્યેન ગુરુઃ સાક્ષાત્પરં પદમ્ ॥ ૧૦૭॥

શ્રુતિસ્મૃતી અવિજ્ઞાય કેવલં ગુરુસેવકાઃ ।
તે વૈ સંન્યાસિનઃ પ્રોક્તા ઇતરે વેષધારિણઃ ॥ ૧૦૮॥

નિત્યં બ્રહ્મ નિરાકારં નિર્ગુણં બોધયેત્ પરમ્ ।
સર્વં બ્રહ્મ નિરાભાસં દીપો દીપાન્તરં યથા ॥ ૧૦૯॥

ગુરોઃ કૃપાપ્રસાદેન આત્મારામં નિરીક્ષયેત્ ।
અનેન ગુરુમાર્ગેણ સ્વાત્મજ્ઞાનં પ્રવર્તતે ॥ ૧૧૦॥

આબ્રહ્મ સ્તંબપર્યન્તં પરમાત્મસ્વરૂપકમ્ ।
સ્થાવરં જઙ્ગમં ચૈવ પ્રણમામિ જગન્મયમ્ ॥ ૧૧૧॥

વન્દેઽહં સચ્ચિદાનન્દં ભેદાતીતં સદા ગુરુમ્ ।
નિત્યં પૂર્ણં નિરાકારં નિર્ગુણં સ્વાત્મસંસ્થિતમ્ ॥ ૧૧૨॥

પરાત્પરતરં ધ્યેયં નિત્યમાનન્દકારકમ્ ।
હૃદયાકાશમધ્યસ્થં શુદ્ધસ્ફટિકસન્નિભમ્ ॥ ૧૧૩॥

સ્ફટિકપ્રતિમારૂપં દૃશ્યતે દર્પણે યથા ।
તથાત્મનિ ચિદાકારમાનન્દં સોઽહમિત્યુત ॥ ૧૧૪॥

અઙ્ગુષ્ઠમાત્રપુરુષં ધ્યાયતશ્ચિન્મયં હૃદિ ।
તત્ર સ્ફુરતિ ભાવો યઃ શ‍ૃણુ તં કથયામ્યહમ્ ॥ ૧૧૫॥

અગોચરં તથાऽગમ્યં નામરૂપવિવર્જિતમ્ ।
નિઃશબ્દં તદ્વિજાનીયાત્ સ્વભાવં બ્રહ્મ પાર્વતિ ॥ ૧૧૬॥

યથા ગન્ધઃ સ્વભાવેન કર્પૂરકુસુમાદિષુ ।
શીતોષ્ણાદિ સ્વભાવેન તથા બ્રહ્મ ચ શાશ્વતમ્ ॥ ૧૧૭॥

સ્વયં તથાવિધો ભૂત્વા સ્થાતવ્યં યત્રકુત્રચિત્ ।
કીટભ્રમરવત્તત્ર ધ્યાનં ભવતિ તાદૃશમ્ ॥ ૧૧૮॥

ગુરુધ્યાનં તથા કૃત્વા સ્વયં બ્રહ્મમયો ભવેત્ ।
પિણ્ડે પદે તથા રૂપે મુક્તોऽસૌ નાત્ર સંશયઃ ॥ ૧૧૯॥

શ્રી પાર્વત્યુવાચ -
પિણ્ડં કિં તુ મહાદેવ પદં કિં સમુદાહૃતમ્ ।
રૂપાતીતં ચ રૂપં કિમેતદાખ્યાહિ શઙ્કર ॥ ૧૨૦॥

શ્રી મહાદેવ ઉવાચ -
પિણ્ડં કુણ્ડલિનીશક્તિઃ પદં હંસમુદાહૃતમ્ ।
રૂપં બિન્દુરિતિ જ્ઞેયં રૂપાતીતં નિરઞ્જનમ્ ॥ ૧૨૧॥

પિણ્ડે મુક્તા પદે મુક્તા રૂપે મુક્તા વરાનને ।
રૂપાતીતે તુ યે મુક્તાસ્તે મુક્તા નાત્ર સંશયઃ ॥ ૧૨૨॥

સ્વયં સર્વમયો ભૂત્વા પરં તત્ત્વં વિલોકયેત્ ।
પરાત્પરતરં નાન્યત્ સર્વમેતન્નિરાલયમ્ ॥ ૧૨૩॥

તસ્યાવલોકનં પ્રાપ્ય સર્વસઙ્ગવિવર્જિતઃ ।
એકાકી નિઃસ્પૃહઃ શાન્તસ્તિષ્ઠાસેત્તત્પ્રસાદતઃ ॥ ૧૨૪॥

લબ્ધં વાऽથ ન લબ્ધં વા સ્વલ્પં વા બહુલં તથા ।
નિષ્કામેનૈવ ભોક્તવ્યં સદા સંતુષ્ટચેતસા ॥ ૧૨૫॥

સર્વજ્ઞપદમિત્યાહુર્દેહી સર્વમયો બુધાઃ ।
સદાનન્દઃ સદા શાન્તો રમતે યત્રકુત્રચિત્ ॥ ૧૨૬॥

યત્રૈવ તિષ્ઠતે સોऽપિ સ દેશઃ પુણ્યભાજનમ્ ।
મુક્તસ્ય લક્ષણં દેવિ તવાગ્રે કથિતં મયા ॥ ૧૨૭॥

ઉપદેશસ્તથા દેવિ ગુરુમાર્ગેણ મુક્તિદઃ ।
ગુરુભક્તિસ્તથા ધ્યાનં સકલં તવ કીર્તિતમ્ ॥ ૧૨૮॥

અનેન યદ્ભવેત્કાર્યં તદ્વદામિ મહામતે ।
લોકોપકારકં દેવિ લૌકિકં તુ ન ભાવયેત્ ॥ ૧૨૯ ॥

લૌકિકાત્કર્મણો યાન્તિ જ્ઞાનહીના ભવાર્ણવમ્ ।
જ્ઞાની તુ ભાવયેત્સર્વં કર્મ નિષ્કર્મ યત્કૃતમ્ ॥ ૧૩૦ ॥

ઇદં તુ ભક્તિભાવેન પઠતે શ‍ૃણુતે યદિ ।
લિખિત્વા તત્પ્રદાતવ્યં તત્સર્વં સફલં ભવેત્ ॥ ૧૩૧ ॥

ગુરુગીતાત્મકં દેવિ શુદ્ધતત્ત્વં મયોદિતમ્ ।
ભવવ્યાધિવિનાશાર્થં સ્વયમેવ જપેત્સદા ॥ ૧૩૨ ॥

ગુરુગીતાક્ષરૈકં તુ મન્ત્રરાજમિમં જપેત્ ।
અન્યે ચ વિવિધા મન્ત્રાઃ કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૧૩૩ ॥

અનન્તફલમાપ્નોતિ ગુરુગીતાજપેન તુ ।
સર્વપાપપ્રશમનં સર્વદારિદ્ર્યનાશનમ્ ॥ ૧૩૪ ॥

કાલમૃત્યુભયહરં સર્વસઙ્કટનાશનમ્ ।
યક્ષરાક્ષસભૂતાનાં ચોરવ્યાઘ્રભયાપહમ્ ॥ ૧૩૫ ॥

મહાવ્યાધિહરં સર્વં વિભૂતિસિદ્ધિદં ભવેત્ ।
અથવા મોહનં વશ્યં સ્વયમેવ જપેત્સદા ॥ ૧૩૬ ॥

વસ્ત્રાસને ચ દારિદ્ર્યં પાષાણે રોગસંભવઃ ।
મેદિન્યાં દુઃખમાપ્નોતિ કાષ્ઠે ભવતિ નિષ્ફલમ્ ॥ ૧૩૭ ॥

કૃષ્ણાજિને જ્ઞાનસિદ્ધિર્મોક્ષશ્રી વ્યાઘ્રચર્મણિ ।
કુશાસને જ્ઞાનસિદ્ધિઃ સર્વસિદ્ધિસ્તુ કંબલે ॥ ૧૩૮ ॥

કુશૈર્વા દૂર્વયા દેવિ આસને શુભ્રકંબલે ।
ઉપવિશ્ય તતો દેવિ જપેદેકાગ્રમાનસઃ ॥ ૧૩૯ ॥

ધ્યેયં શુક્લં ચ શાન્ત્યર્થં વશ્યે રક્તાસનં પ્રિયે ।
અભિચારે કૃષ્ણવર્ણં પીતવર્ણં ધનાગમે ॥ ૧૪૦ ॥

ઉત્તરે શાન્તિકામસ્તુ વશ્યે પૂર્વમુખો જપેત્ ।
દક્ષિણે મારણં પ્રોક્તં પશ્ચિમે ચ ધનાગમઃ ॥ ૧૪૧ ॥

મોહનં સર્વભૂતાનાં બન્ધમોક્ષકરં ભવેત્ ।
દેવરાજપ્રિયકરં સર્વલોકવશં ભવેત્ ॥ ૧૪૨ ॥

સર્વેષાં સ્તંભનકરં ગુણાનાં ચ વિવર્ધનમ્ ।
દુષ્કર્મનાશનં ચૈવ સુકર્મસિદ્ધિદં ભવેત્ ॥ ૧૪૩ ॥

અસિદ્ધં સાધયેત્કાર્યં નવગ્રહભયાપહમ્ ।
દુઃસ્વપ્નનાશનં ચૈવ સુસ્વપ્નફલદાયકમ્ ॥ ૧૪૪ ॥

સર્વશાન્તિકરં નિત્યં તથા વન્ધ્યાસુપુત્રદમ્ ।
અવૈધવ્યકરં સ્ત્રીણાં સૌભાગ્યદાયકં સદા ॥ ૧૪૫ ॥

આયુરારોગ્યમૈશ્વર્યપુત્રપૌત્રપ્રવર્ધનમ્ ।
અકામતઃ સ્ત્રી વિધવા જપાન્મોક્ષમવાપ્નુયાત્ ॥ ૧૪૬ ॥

અવૈધવ્યં સકામા તુ લભતે ચાન્યજન્મનિ ।
સર્વદુઃખભયં વિઘ્નં નાશયેચ્છાપહારકમ્ ॥ ૧૪૭ ॥

સર્વબાધાપ્રશમનં ધર્માર્થકામમોક્ષદમ્ ।
યં યં ચિન્તયતે કામં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ॥ ૧૪૮ ॥

કામિતસ્ય કામધેનુઃ કલ્પનાકલ્પપાદપઃ ।
ચિન્તામણિશ્ચિન્તિતસ્ય સર્વમઙ્ગલકારકમ્ ॥ ૧૪૯ ॥

મોક્ષહેતુર્જપેન્નિત્યં મોક્ષશ્રિયમવાપ્નુયાત્ ।
ભોગકામો જપેદ્યો વૈ તસ્ય કામફલપ્રદમ્ ॥ ૧૫૦ ॥

જપેચ્છાક્તશ્ચ સૌરશ્ચ ગાણપત્યશ્ચ વૈષ્ણવઃ ।
શૈવશ્ચ સિદ્ધિદં દેવિ સત્યં સત્યં ન સંશયઃ ॥ ૧૫૧ ॥

અથ કામ્યજપે સ્થાનં કથયામિ વરાનને ।
સાગરે વા સરિત્તીરેઽથવા હરિહરાલયે ॥ ૧૫૨ ॥

શક્તિદેવાલયે ગોષ્ઠે સર્વદેવાલયે શુભે ।
વટે ચ ધાત્રીમૂલે વા મઠે વૃન્દાવને તથા ॥ ૧૫૩ ॥

પવિત્રે નિર્મલે સ્થાને નિત્યાનુષ્ઠાનતોઽપિ વા ।
નિર્વેદનેન મૌનેન જપમેતં સમાચરેત્ ॥ ૧૫૪ ॥

શ્મશાને ભયભૂમૌ તુ વટમૂલાન્તિકે તથા ।
સિદ્ધ્યન્તિ ધૌત્તરે મૂલે ચૂતવૃક્ષસ્ય સન્નિધૌ ॥ ૧૫૫ ॥

ગુરુપુત્રો વરં મૂર્ખસ્તસ્ય સિદ્ધ્યન્તિ નાન્યથા ।

શુભકર્માણિ સર્વાણિ દીક્ષાવ્રતતપાંસિ ચ ॥ ૧૫૬॥

સંસારમલનાશાર્થં ભવપાશનિવૃત્તયે ।
ગુરુગીતામ્ભસિ સ્નાનં તત્ત્વજ્ઞઃ કુરુતે સદા ॥ ૧૫૭॥

સ એવ ચ ગુરુઃ સાક્ષાત્ સદા સદ્બ્રહ્મવિત્તમઃ ।
તસ્ય સ્થાનાનિ સર્વાણિ પવિત્રાણિ ન સંશયઃ ॥ ૧૫૮॥

સર્વશુદ્ધઃ પવિત્રોઽસૌ સ્વભાવાદ્યત્ર તિષ્ઠતિ ।
તત્ર દેવગણાઃ સર્વે ક્ષેત્રે પીઠે વસન્તિ હિ ॥ ૧૫૯॥

આસનસ્થઃ શયાનો વા ગચ્છંસ્તિષ્ઠન્ વદન્નપિ ।
અશ્વારૂઢો ગજારૂઢઃ સુપ્તો વા જાગૃતોઽપિ વા ॥ ૧૬૦॥

શુચિષ્માંશ્ચ સદા જ્ઞાની ગુરુગીતાજપેન તુ ।
તસ્ય દર્શનમાત્રેણ પુનર્જન્મ ન વિદ્યતે ॥ ૧૬૧॥

સમુદ્રે ચ યથા તોયં ક્ષીરે ક્ષીરં ઘૃતે ઘૃતમ્ ।
ભિન્ને કુંભે યથાકાશસ્તથાત્મા પરમાત્મનિ ॥ ૧૬૨॥

તથૈવ જ્ઞાની જીવાત્મા પરમાત્મનિ લીયતે ।
ઐક્યેન રમતે જ્ઞાની યત્ર તત્ર દિવાનિશમ્ ॥ ૧૬૩॥

એવંવિધો મહામુક્તઃ સર્વદા વર્તતે બુધઃ ।
તસ્ય સર્વપ્રયત્નેન ભાવભક્તિં કરોતિ યઃ ॥ ૧૬૪॥

સર્વસન્દેહરહિતો મુક્તો ભવતિ પાર્વતિ ।
ભુક્તિમુક્તિદ્વયં તસ્ય જિહ્વાગ્રે ચ સરસ્વતી ॥ ૧૬૫॥

અનેન પ્રાણિનઃ સર્વે ગુરુગીતા જપેન તુ ।
સર્વસિદ્ધિં પ્રાપ્નુવન્તિ ભુક્તિં મુક્તિં ન સંશયઃ ॥ ૧૬૬॥

સત્યં સત્યં પુનઃ સત્યં ધર્મ્યં સાઙ્ખ્યં મયોદિતમ્ ।
ગુરુગીતાસમં નાસ્તિ સત્યં સત્યં વરાનને ॥ ૧૬૭॥

એકો દેવ એકધર્મ એકનિષ્ઠા પરં તપઃ ।
ગુરોઃ પરતરં નાન્યન્નાસ્તિ તત્ત્વં ગુરોઃ પરમ્ ॥ ૧૬૮॥

માતા ધન્યા પિતા ધન્યો ધન્યો વંશઃ કુલં તથા ।
ધન્યા ચ વસુધા દેવિ ગુરુભક્તિઃ સુદુર્લભા ॥ ૧૬૯॥

શરીરમિન્દ્રિયં પ્રાણાશ્ચાર્થઃ સ્વજનબાન્ધવાઃ ।
માતા પિતા કુલં દેવિ ગુરુરેવ ન સંશયઃ ॥ ૧૭૦॥

આકલ્પજન્મના કોટ્યા જપવ્રતતપઃક્રિયાઃ ।
તત્સર્વં સફલં દેવિ ગુરુસંતોષમાત્રતઃ ॥ ૧૭૧॥

વિદ્યાતપોબલેનૈવ મન્દભાગ્યાશ્ચ યે નરાઃ ।
ગુરુસેવાં ન કુર્વન્તિ સત્યં સત્યં વરાનને ॥ ૧૭૨॥

બ્રહ્મવિષ્ણુમહેશાશ્ચ દેવર્ષિપિતૃકિન્નરાઃ ।
સિદ્ધચારણયક્ષાશ્ચ અન્યેઽપિ મુનયો જનાઃ ॥ ૧૭૩॥

ગુરુભાવઃ પરં તીર્થમન્યતીર્થં નિરર્થકમ્ ।
સર્વતીર્થાશ્રયં દેવિ પાદાઙ્ગુષ્ઠં ચ વર્તતે ॥ ૧૭૪॥

જપેન જયમાપ્નોતિ ચાનન્તફલમાપ્નુયાત્ ।
હીનકર્મ ત્યજન્સર્વં સ્થાનાનિ ચાધમાનિ ચ ॥ ૧૭૫॥

જપં હીનાસનં કુર્વન્હીનકર્મફલપ્રદમ્ ।
ગુરુગીતાં પ્રયાણે વા સઙ્ગ્રામે રિપુસઙ્કટે ॥ ૧૭૬॥

જપઞ્જયમવાપ્નોતિ મરણે મુક્તિદાયકમ્ ।
સર્વકર્મ ચ સર્વત્ર ગુરુપુત્રસ્ય સિદ્ધ્યતિ ॥ ૧૭૭॥

ઇદં રહસ્યં નો વાચ્યં તવાગ્રે કથિતં મયા ।
સુગોપ્યં ચ પ્રયત્નેન મમ ત્વં ચ પ્રિયા ત્વિતિ ॥ ૧૭૮॥

સ્વામિ મુખ્યગણેશાદિ વિષ્ણ્વાદીનાં ચ પાર્વતિ ।
મનસાપિ ન વક્તવ્યં સત્યં સત્યં વદામ્યહમ્ ॥ ૧૭૯॥

અતીવપક્વચિત્તાય શ્રદ્ધાભક્તિયુતાય ચ ।
પ્રવક્તવ્યમિદં દેવિ મમાત્માઽસિ સદા પ્રિયે ॥ ૧૮૦॥

અભક્તે વઞ્ચકે ધૂર્તે પાખણ્ડે નાસ્તિકે નરે ।
મનસાપિ ન વક્તવ્યા ગુરુગીતા કદાચન ॥ ૧૮૧॥

સંસારસાગરસમુદ્ધરણૈકમન્ત્રં
    બ્રહ્માદિદેવમુનિપૂજિતસિદ્ધમન્ત્રમ્ ।

દારિદ્ર્યદુઃખભવરોગવિનાશમન્ત્રં
    વન્દે મહાભયહરં ગુરુરાજમન્ત્રમ્ ॥ ૧૮૨॥

॥ ઇતિ શ્રીસ્કંદપુરાણે ઉત્તરખંડે ઈશ્વરપાર્વતી સંવાદે ગુરુગીતા સમાપ્ત ॥

॥ શ્રીગુરુદત્તાત્રેયાર્પણમસ્તુ ॥

Transliterated by Kapila Shankaran

*guru gItA - short version*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*